# Shri Narmada Stotram Mantragarbha

# श्रीनर्मदास्तोत्रम् मन्त्रगर्भ

## Document Information

Text title : shrinarmada Stotram Mantragarbha

File name : narmadAstotrammantragarbha.itx

Category : devii, vAsudevAnanda-sarasvatI, devI, nadI, mantra

Location : doc_devii

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : sanskrit@cheerful.com


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 23, 2022

*sanskritdocuments.org*

# श्रीनर्मदास्तोत्रम् मन्त्रगर्भ

वारिताऽनर्थसङ्घा या अनन्य नतमुक्तये ।
सुष्टुशर्मनिदानायै नद्यै पुम्मोहसंहृते ॥ १॥

देवर्षि दानवेड्यायै सूक्ष्मवस्तुदृशे नमः ।
वाक्यार्थायै सोमपुत्र्यै यातनाऽनलशान्तये ॥ २॥

नन्दायै नर्मदायै ते त्रिधाकर्मविशुद्धये ।
दयादमः स्थैर्यकर्त्र्यै संसिद्ध्यै देवतात्मने ॥ ३॥

सत्यसम्प्राप्तिकारिण्यै भूत्यै सन्तुष्टिहेतवे ।
रम्यायै तत्त्वरूपिण्यै तपस्व्यभ्यं तरात्मने ॥ ४॥

स्वच्छ स्वर्नद्यधिस्वाम्बु दमित त्रासिभीतये ।
तीव्रशर्महृते पुंहृत्तापघ्न्ये हितकीर्तये ॥ ५॥

कृतापदाविमोक्षायै त्रेधाधर्माङ्गमूर्तये ।
तपोदा यै तपःसिद्ध्यै यज्ञाङ्ग्यै विषभीहृते ॥ ६॥

रेवायै नरतापघ्न्यै दिव्यायै षड्विषद्धृते ।
वासनामोक्षदक्षायै गङ्गायै सत्यकीर्तये ॥ ७॥

स्तुतायै नित्यदीप्तायै बलिसर्पदद्दुद्धृते ।
तितिक्षु शिवसन्धात्र्यै रत्यै चेतः समाधये ॥ ८॥

जय जय शिवकन्ये नर्मदे शर्मदे त्वं
    जय जय जनमान्ये धर्मदेऽधर्मदे त्वम् ।
जय जय सुवदान्ये धर्मदे कर्मदे त्वं
    जय जय भुवि धन्ये भर्मदे वर्मदे त्वम् ॥ ९॥

मन्त्राद्याक्षरसहित -
    नर्मदायै नमः प्रातर्नर्मदायै नमो निशि ।

नमोऽस्तु नर्मदे तुभ्यं त्राहि मां विषसर्पतः ॥

वा रिताऽ न र्थसङ्घा या अ नन्य न तमुक्तये ।
सु ष्टुश र्म निदानायै न द्यै पुं मो हसंहृते ॥ १॥

दे वर्षि दा नवेड्यायै सू क्ष्मव स्तु दृशे नमः ।
वा क्यार्था यै सोमपुत्र्यै या तनाऽ न लशान्तये ॥ २॥

नं दायै न र्मदायै ते त्रि धाक र्म विशुद्धये ।
द या द मः स्थैर्यकर्त्र्यै सं सिद्ध्यै दे वतात्मने ॥ ३॥

स त्य सं प्रा प्तिकारिण्यै भू त्यै सं तु ष्टिहेतवे ॥

र म्यायै त त्त्वरूपिण्यै त पस्व्य भ्यं तरात्मने ॥ ४॥

स्व च्छ स्व र्न द्यधिस्वाम्बु द मित त्रा सिभीतये ।
ती व्रश र्म हृते पुंह त्ता पघ्न्ये हि तकीर्तये ॥ ५॥

कृ ताप दा विमोक्षायै त्रे धाधर् मां गमूर्तये ।
त पोदा यै तपःसिद्ध्यै य ज्ञाङ्ग्यै वि षभीहृते ॥ ६॥

रे वायै न रतापघ्न्यै दि व्यायै ष ड्विषद्धृते ।
वा सना मो क्षदक्षायै गं गायै स त्यकीर्तये ॥ ७॥

स्तु तायै नि त्यदीप्तायै ब लिस र्प ददुद्धृते ।
ति तिक्षु शि वसन्धात्र्यै र त्यै चे तः समाधये ॥ ८॥

जय जय शिवकन्ये नर्मदे शर्मदे त्वं
जय जय जनमान्ये धर्मदेऽधर्मदे त्वम् ।
जय जय सुवदान्ये धर्मदे कर्मदे त्वं
जय जय भुवि धन्ये भर्मदे वर्मदे त्वम् ॥ ९॥

इति श्रीवासुदेवानन्दसरस्वतीविरचितं श्रीनर्मदास्तोत्रं सम्पूर्णम् ।

*Shri Narmada Stotram Mantragarbha*

pdf was typeset on December 23, 2022

Please send corrections to *sanskrit@cheerful.com*